( अन्नम् । यथा, ऋग्वेदे । ४ । ५२ । ११ ।
"वयं स्याम यशसो जनेषु ।"
"यशसः कीर्त्तेरन्नस्य वा ।" इति तद्भाष्ये
सायणः ॥ त्रि, यशस्वी । यथा, ऋग्वेदे । ८ ।
७९ । ५ ।
"त्वमिन्द्र यशा अस्यृजीषी शवसस्पते ।"
"त्वं यशाः यशस्व्यसि भवसि ।" इति तद्भाष्ये
सायणः ॥ )

यशःपटहः, पुं, (यशःसूचकः पटहः । शाकपार्थिव-
वत् समासः । ) ढक्का । इत्यमरः । १ । ७ । ६ ॥

यशःशेषः, त्रि, ( यश एव शेषोऽस्य । ) मृतः ।
इति हेमचन्द्रः । ३ । ३८ ॥ ( यथा, कथासरित्-
सागरे । ६१ । ४४ ।
"ततः क्रमेण तेनैव स्मरज्वरभरोष्मणा ।
प्रक्षीणदेहः प्रययौ स यशःशेषतां नृपः ॥" )
मरणे, पुं ॥

यशदं, क्ली, धातुविशेषः । दस्ता इति भाषा । यथा,
"यशदं रङ्गसदृशं रीतिहेतुश्च तन्मतम् ।
यशदं तुवरं तिक्तं शीतलं कफपित्तहृत् ।
चक्षुष्यं परमं मेहान् पाण्डुं श्वासञ्च नाशयेत् ॥"
इति भावप्रकाशः ॥

यशस्करः, त्रि, कीर्त्तिकारकः । सुख्यातिजनकः ।
यशस्करोति य इत्यर्थे ("कृञो हेतुताच्छील्यानु-
लोम्येषु ।" ३।२।२० ।) इति टप्रत्ययेन निष्पन्नः ।
यशस्करी विद्या इति व्याकरणम् ॥ (यथा,
मनौ । ८ । ३८३ ।
"एतेषां निग्रहो राज्ञः पञ्चानां विषये स्वके ।
साम्राज्यकृत् सजात्येषु लोके चैव यशस्करः ॥"
विष्णुक्षेत्रविशेषे, क्ली । यथा, नारसिंहे ६२ अः ।
"विरजं पुष्पवत्यायां वालचामीकरे विदुः ।
यशस्करं विपाशायां माहिष्मत्यां हुताशनम् ॥"
शोभावतीपुर्य्यां जाते ब्राह्मणविशेषे, पुं । यथा,
कथासरित्सागरे । १०४ । १६ ।
"तस्यां यशस्करो नाम विद्वानाढ्यो बहुक्रतुः ।
ब्राह्मणोऽभूदभूत्तस्य सत्पत्नी मेखलेति च ॥" )

यशस्या, स्त्री, ( यशसे हिता । यशस्+यत् । )
जीवन्ती । ऋद्धिनामौषधिः । इति राज-
निर्घण्टः ॥

यशस्वान्, [त्] त्रि, (यशोऽस्त्यस्य । यशस्+मतुप् ।
मस्य वः ।) कीर्त्तिविशिष्टः । इति व्याकरणम् ॥
( यथा, अथर्व्ववेदे । ६ । ५८ । २ ।
"यथेन्द्रो द्यावापृथिव्योर्यशस्वान्
यथाप ओषधीषु यशस्वतीः ॥" )

यशस्विनी, स्त्री, (यशस्विन्+ङीप् । ) वनका-
र्पासी । इति शब्दरत्नावली ॥ यवतिक्ता । महा-
ज्योतिष्मती । इति राजनिर्घण्टः ॥ (सत्यव्रतस्य
पत्नी । यथा, कथासरित्सागरे । ७३।२५७ ।
"अहं यशस्वती नाम राजसेवानुजीविनः ।
भार्य्या सत्यव्रताख्यस्य विप्रस्येहामलान्वया ॥"
गङ्गा । यथा, काशीखण्डे तत्सहस्रनामकथने ।
२९ । १४१ ।
"यशस्विनी यशोदा च योग्या युक्तात्मसेविता ॥" )

यशस्वी, [न्] त्रि, ( यशोऽस्यास्तीति । यशस्+
"अस्मायेति ।" ५ । २ । १२१ । इति विनिः । )
यशोविशिष्टः । कीर्त्तिमान् । इति व्याकरणम् ॥
( यथा, मनौ । ९ । ३३४ ।
"विप्राणां वेदविदुषां गृहस्थानां यशस्वि-
नाम् ।
शुश्रूषैव तु शूद्रस्य धर्म्मो नैःश्रेयसः परः ॥" )

यशोदः, पुं, ( यशो ददातीति । दा+कः । )
पारदः । इति राजनिर्घण्टः ॥ ( क्लीवेऽपि
दृश्यते । यथा, वाराहे ।
"सुवर्णं रजतं ताम्रं रङ्गं यशोदमेव च ।
सीसं लौहञ्च षष्ठैते धातवो गिरिसम्भवाः ॥" )
यशोदातरि, त्रि ॥

यशोदा, स्त्री, (यशो ददातीति । दा+कः । टाप् ।)
नन्दपत्नी । यथा, श्रीभागवते १० स्कन्धे ।
"नन्दः किमकरोद्ब्रह्मन् श्रेय एवं महोदयम् ।
यशोदा वा महाभागा पपौ यस्याः स्तनं
हरिः ॥"
(दिलीपमाता । यथा, हरिवंशे । १८ । ६० ।
"तेषान्तु मानसी कन्या यशोदा नाम विश्रुता ।
पत्नी सा विश्वमहतः स्नुषा वै दृढशर्म्मणः ।
राजर्षेर्जननी चापि दिलीपस्य महात्मनः ॥"
यशोदातरि, त्रि । यथा, तैत्तिरीयसंहिता-
याम् । ४ । ४ । ६ । २ ।
"यशोदां त्वा यशसि तेजोदां त्वा तेजसीति ॥" )

यष्टा, [ऋ] पुं, (यजते इति । यज्+तृच् ।) याग-
कर्त्ता । तत्पर्य्यायः । यजमानः २ । इत्यमरः । २।
७ । ८ ॥ (यथा, मार्कण्डेये । १२० । २ ।
"स दानशीलो यष्टा च यज्वानामवनीपतिः ॥" )

यष्टिः, पुं, ( इज्यते इति । यज्+बाहुलकात्
तिः । इति उणादिवृत्तौ उज्ज्वलदत्तः ।४।१७९।)
ध्वजदण्डः । इति विश्वशब्दरत्नावल्यौ ॥ भुज-
दण्डः । इति मेदिनी । टे, २६ ॥

यष्टिः, पुं, स्त्री, ( यजति सङ्गच्छते । यज्+तिः । )
तन्तुः । इति शब्दमाला ॥ हारलता । (हारा-
वलिः । यथा, रघौ । १३ । ५४ ।
"क्वचित्प्रभालेपिभिरिन्द्रनीलै-
र्मुक्तामयी यष्टिरिवानुविद्धा ।
अन्यत्र माला सितपङ्कजानां
इन्दीवरैरुत्खचितान्तरेव ॥"
"यष्टिः हारावलिः ।" इति मल्लिनाथः ॥ * ॥)
भार्गी । मधुका । शाखभेदः । इति मेदिनी ।
टे, २६ ॥ शेषस्य पर्य्यायः । दण्डः २ । लगुडः ३
इति हेमचन्द्रः । ३ । ४४९ ॥ तद्दानफलं यथा,
वह्निपुराणे ।
"यष्टिं ये तु प्रयच्छन्ति नेत्रहीने सुदुर्ब्बले ।
तेषान्तु विपुलः पुंसां सन्तानो मोहवर्ज्जितः ॥"
( स्त्री, शाखा । यथा, कुमारे । ६ । २ ।
"चूतयष्टिरिवाभ्यासे मधौ परभृतोन्मुखी ॥"
"चूतयष्टिः चूतशाखा इव ।" इति तत्र मल्लि-
नाथः ॥ यष्टिमधु । तत्पर्य्यायः । यथा,
"यष्ट्याह्वं मधुकं यष्टिः क्लीतकं मधुयष्टिका ।
यष्टिमधु स्वलेजाता जलजातिरसा पुरा ॥"
इति वैद्यकरत्नमालायाम् ॥)

यष्टिकः, पुं, ( यष्टिरिव । कन् । ) जलकुक्कुटः ।
इति शब्दरत्नावली ॥ ( यष्टि+स्वार्थे कन् । )
दण्डश्च ॥

यष्टिका, स्त्री, (यष्टि+स्वार्थे कन् । टाप् ।) हार-
भेदः । यथा,—
"यष्टिका दण्डिका चैव तिलका सारिकेत्यपि ॥"
इति जटाधरः ॥
वापी । यथा,—
"पल्वलं दीर्घिका वापी यष्टिका मीनगोधिका ॥"
इति त्रिकाण्डशेषः ॥
यष्टिमधुका । यथा,—
"अथ यष्टीमधुकं स्यान्मधुयष्टी तु यष्टिका ।"
इति शब्दरत्नावली ॥
लगुडः । यथा,—
"अथ शक्तिश्च शक्ती च यष्टिर्यष्टी च यष्टिका ।
दण्डः काण्डोऽपि लगुडः पशुघ्नो दण्डको-
ऽपि च ॥"
इति शब्दरत्नावली ॥

यष्टिग्रहः, पुं, ( यष्टिं गृह्णातीति । यष्टि+ग्रह+
"शक्तिलाङ्गलाङ्कुशयष्टितोमरेति ।" ३ । २ । ९ ।
इत्यस्य वार्त्ति॰ अच् । ) यष्टिधारकः । लगुड-
ग्राही । इति मुग्धबोधटीकायां दुर्गादासः ॥

यष्टिमधु, क्ली, (यष्ट्यां मधु माधुर्य्यमस्य । ) यष्टि-
मधुका । इति हलायुधः ॥ ( यथास्य पर्य्यायः ।
"यष्ट्याह्वं मधुकं यष्टिः क्लीतकं मधुयष्टिका ।
यष्टिमधु स्वलेजाता जलजातिरसा पुरा ॥"
इति वैद्यकरत्नमालायाम् ॥)

यष्टिमधुका, स्त्री, (यष्टिमधुवत् कायतीति । कै+
कः ।) यष्टिमधु । तत्पर्य्यायः । क्लीतकम् २ मधु-
कम् ३ मधुयष्टिका ४ । इत्यमरः । २।४।१०९ ॥
यष्ट्याह्वम् ५ यष्टिः ६ स्वलेजातं चेत् यष्टिमधु ७
जलजा चेत् अतिरसा ८ । इति रत्नमाला ॥
अपि च ।
"ज्येष्ठीमधु तथा यष्टीमधुकं क्लीतकं तथा ।
अन्यत्क्लीतनकं तत्तु भवेत्तोये मधूलिका ॥"
अस्या गुणाः ।
"यष्टी हिमा गुरुः स्वाद्वी चक्षुष्या बलवर्ण-
कृत् ।
सुस्निग्धा शुक्रला केश्या स्वर्य्या पित्तानिला-
स्रजित् ।
व्रणशोथविषच्छर्द्दितृष्णाग्लानिक्षयापहा ॥"
इति भावप्रकाशः ॥

यष्टी, स्त्री, ( यष्टि+"कृदिकारादक्तिनः ।" इति
ङीष् । ) यष्टिमधु । इति भावप्रकाशः ॥
( यथास्याः पर्य्यायः ।
"यष्टी यष्ट्याह्वयं प्रोक्तं मधुकं मधुयष्टिका ।"
इति गारुडे २०८ अध्यायः ॥
तथास्या गुणाः । भावप्रकाशस्य पूर्व्वखण्डे १ ।
"यष्टी हिमा गुरुः स्वाद्वी चक्षुष्या बलवर्ण-
कृत् ।